# Kailasavarnanam 3

# कैलासवर्णनम् ३

## Document Information

Text title : Kailasavarnanam 3

File name : kailAsavarNanam3.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 23 - kailAsavarNane skandakRitastutiH | 1-33||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# कैलासवर्णनम् ३

(कैलासशैले स्कन्दगोपुरवर्णनम् ३)

स्कन्दः -
शृणुध्वं ब्रह्मविष्ण्वाद्या जैगीषव्य गणोत्तमाः ।
तत्रान्तरेऽस्ति प्राकारो गोमेदमणिकल्पितः ॥ १॥

गोमेदगोपुरश्चैव चतुर्दिक्षु विराजितः ।
चतुर्दिक्षु गोपुराणि लक्षमानेन सत्तमाः ॥ २॥

वेदिकापट्टिकाभिश्च तोरणालङ्कृतानि हि ।
राजत्कुम्भपताकाग्रैर्वृषभैस्तन्मणिप्रभैः ॥ ३॥

रुद्रावताररचितैर्गवाक्षैस्स्फाटिकैरपि ।
कुमुदैर्व्यालिपीठैश्च दैवगोष्ठ युतान्यपि ॥ ४॥

मण्डपावलिसङ्क्लृप्तैस्सहस्रायुतशो गणैः ।
मणिकाञ्चनचित्रैश्च मुक्तावितततोरणैः ॥ ५॥

सरोभिस्सागराकारै रत्नसोपानमण्डितैः ।
तत्प्रान्तमण्डपवरैस्सहस्रस्तम्भशोभितैः ॥ ६॥

सरोमध्यमणिभ्राजन्मण्टपैरुच्छ्रितैरपि ।
तत्रान्तरे तु प्राकारे गोपुरान्तरदक्षिणे ॥ ७॥

तत्र मत्सदनं दिव्यं नानारत्नचितं शुभम् ।
लक्षस्तम्भयुतं सौधं नवरत्नाग्रशृङ्गकम् ॥ ८॥

तत्सालभञ्जिकानिर्यद्रनकान्तिविभासितम् ।
(तमस्स्तोमतिरस्कारीतिकान्तिविभासितम् ।)
तेतः पश्चादंशुमद्भिर्मणिभिः कृतशेखरं ॥ ९॥

गवाक्षितं विचित्रैश्च नवरत्नप्रभाधिकम् ।

हरिन्मणिकृतैश्चैव मयूरवरकुक्कुटैः ॥ १० ॥

शोभितैर्मण्टपाग्रैश्च वरप्रासादतोरणैः ।
प्राकारैस्सुन्दरतरैर्गोपुरावलिभासुरैः ॥ ११ ॥

मणिद्वारकवाटैश्च शातकुम्भशलाककैः ।
धूपामोदयुतापाररम्योद्दामसुगन्धितम् ॥ १२ ॥

मणिदीपप्रभाभासिरञ्जिताखिलदिक्तटम् ।
तत्र दिव्यसुमामोदि वनं चैत्ररथाधिकम् ॥ १३ ॥

मण्यालवालकलितरत्नवेदित्विषाततम् ।
नानादेवद्रुमापारवल्लीगुच्छविराजितम् ॥ १४ ॥

कौमारनाम तत्रास्ति सरश्चोत्फुल्लपङ्कजम् ।
मणिसोपानपालीभिस्तत्प्रान्तमणिमण्डपैः ॥ १५ ॥

क्रीडामृगैश्शुकैश्चापि मणिपञ्जरशारिकैः ।
तत्र तत्सौधमध्यस्थं मम सौधवराश्रयम् ॥ १६ ॥

सिह्मासनं रत्नक्लृप्तं पञ्चयोजनविस्तृतम् ।
तत्राहं सेवितो वीरैर्नवलक्षैरुदायुधैः ॥ १७ ॥

सिह्मसंहननैर्वीरैः कौमारैरुद्यदायुधैः ।
मत्तद्विपकराकारबाहुभिश्शक्तिसंयुतैः ॥ १८ ॥

वीरबाहुप्रभृतिभिः पुष्पवस्त्राङ्गलेपनैः ।
छत्रचामरहस्तैश्चाप्यासेऽहं सेवितस्तदा ॥ १९ ॥

महार्हवसनोपेतो नवरत्नविभूषणः ।
षड्वक्रमुकुटोद्भासि रत्नकुण्डलकाङ्गदः ॥ २० ॥

रत्नाङ्गुलीयविलसत्तलाङ्गुलिपदाम्बुजः ।
मणिमाणिक्यमञ्जीररणन्नूपुरमेखलः ॥ २१ ॥

देववल्या सेनया चापीन्द्राद्यैरपि सेवितः ।
षड्भिश्च वदनैर्देवं स्तुवन्द्वादशलोचनैः ॥ २२ ॥

पश्यन्लिङ्गं (पश्यँलिङ्गं) हि कैलासे कौमारेश्वरमीश्वरम् ।
हीरसारमहाधाराप्रकारे दक्षिणे स्थितः ॥ २३ ॥

तन्नीलगोपुरोत्तुङ्गनीलधाराततता दिशः ।
रुद्रावतारक्रीडादितलशोभैकभासुरम् ॥ २४॥

राजल्ललामवृषभं शम्भोः कैलासगोपुरम् ।
पञ्चलक्षप्रमाणेन कल्पितं विस्तरायतम् ॥ २५॥

दक्षिणे गोपुरप्रान्ते शम्भोः प्राकारमध्यमे ।
तत्कौमारपुरं मेऽद्य नानासौधविराजितं ॥ २६॥

कौमारैर्मद्गणश्रेष्ठैर्मया च परिपालितम् ।
तत्र मत्पुरमध्यस्थं कौमारेशस्य गोपुरम् ॥ २७॥

नवरत्नप्रभाभास्वत्प्राकाराट्टालसुन्दरम् ।
गर्भागारमहाकान्तिधगद्धगितदिङ्मुखम् ॥ २८॥

मणिकुम्भोद्यतशिखावलीढगगनाङ्कणम् ।
ममेष्टलिङ्गन्तत्रैव देवदेवस्य शूलिनः ॥ २९॥

त्रिकालं तत्र तल्लिङ्गं पूजयामि गणैर्वृतः ।
धूपैर्दीप्यैश्च नैवेद्यैः पञ्चामृतनिषेचनैः ॥ ३०॥

वीणावेणमृदङ्गादिशङ्खकाहलनिस्वनैः ।
मधुरोद्दामगीतैश्च कौमारीणाञ्च नर्तनैः ॥ ३१॥

हावभावमनोहारितौर्यत्रिकमनोहरैः ।
षड्वक्त्रभालकलित त्रिपुण्ड्रतिलकोज्वलः ॥ ३२॥

भस्मरुद्राक्षवलयसरावलिविभूषितः ।
षडक्त्रपङ्कजस्यन्दिसुधासममहारसैः ॥ ३३॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये कैलासशैले स्कन्दगोपुरवर्णनम् ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः २३ - कैलासवर्णने स्कन्दकृतस्तुतिः । १-३३॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 23 - kailAsavarNane skandakRRitastutiH . 1-33..

Notes:

Skanda स्कन्द describes to Jaigīṣavya जैगीषव्य, about His residence towards the Southern region of Mount Kailāsa कैलास शैल, that has predominance of Hessonite - viz. Gomedamaṇi गोमेदमणि; and mentions about the Kaumāreśvaramīśvaraṃ Śivaliṅga कौमारेश्वरमीश्वरं शिवलिङ्ग that He worships there.

Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) शिवरहस्यम् अंशः-१ (माहेश्वराख्य) has several descriptions about Mount Kailāsa कैलास शैल and Śiva शिव. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

---

*Kailasavarnanam 3*

pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*